শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩৭

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩৭

*কৃষ্ণাৱতারপ্রসঙ্গৱর্ণনম্*

সান্দ্রানন্দতনো হরে ননু পুরা দৈৱাসুরে সঙ্গরে
ত্বতকৃত্তা অপি কর্মশেষ ৱশতো যে তে ন যাতা গতিম্।
তেষাং ভূতলজন্মনাং দিতিভুৱাং ভারেণ দূরার্দিতা
ভূমিঃ প্রাপ ৱিরিঞ্চমাশ্রিতপদং দেৱৈঃ পুরৈৱাগতৈঃ॥ ১ ॥

হা হা দুর্জনভূরিভারমথিতাং পাথোনিধৌ পাতুকাং
এতাং পালয হন্ত মে ৱিৱশতাং সম্পৃচ্ছ দেৱানিমান্।
ইত্যাদি প্রচুরপ্রলাপৱিৱশামালোক্য ধাতা মহীং
দেৱানাং ৱদনানি ৱীক্ষ্য পরিতো দধ্যৌ ভৱন্তং হরে॥ ২ ॥

ঊচে চাম্বুজভূরমূনযি সুরাঃ সত্যং ধরিত্র্যা ৱচো
নন্বস্যা ভৱতাং চ রক্ষণৱিধৌ দক্ষো হি লক্ষ্মীপতিঃ।
সর্ৱে শর্ৱপুরসসরা ৱযমিতো গত্বা পযোৱারিধিং
নত্বা তং স্তুমহে জৱাদিতি যযুঃ সাকং তৱাকেতনম্॥ ৩ ॥

তে মুগ্ধানিলশালি দুগ্ধজলধেস্তীরং গতাঃ সঙ্গতা
যাৱত্ত্বতপদচিন্তনৈকমনসস্তাৱত্ স পাথোজভূঃ।
ত্বদ্বাচং হৃদযে নিশম্য সকলানানন্দযন্নূচিৱা-
নাখ্যাতঃ পরমাত্মনা স্বযমহং ৱাক্যং তদাকর্ণ্যতাম্॥ ৪ ॥

জানে দীনদশামহং দিৱিষদাং ভূমেশ্চ ভীমৈর্নৃপৈ-
স্তৎক্ষেপায ভৱামি যাদৱকুলে সোঽহং সমগ্রাত্মনা।
দেৱা ৱৃষ্ণিকুলে ভৱন্তু কলযা দেৱাঙ্গনাশ্চাৱনৌ
মতসেৱার্থমিতি ত্বদীযৱচনং পাথোজভূরূচিৱান্॥ ৫ ॥

শ্রুত্বা কর্ণরসাযনং তৱ ৱচঃ সর্ৱেষু নির্ৱাপিত-
স্বান্তেষ্বীশ গতেষু তাৱককৃপাপীযূষতৃপ্তাত্মসু।
ৱিখ্যাতে মধুরাপুরে কিল ভৱত- সান্নিধ্যপুণ্যোত্তরে
ধন্যাং দেৱকনন্দিনীমুদৱহদ্রাজা স শূরাত্মজঃ॥ ৬ ॥

উদ্বাহাৱসিতৌ তদীযসহজঃ কংসোথ সম্মানয-
ন্নেতৌ সূততযা গতঃ পথি রথে ৱ্যোমোত্থযা ত্বদ্গিরা।
অস্যাস্ত্বামতিদুষ্টমষ্টমসুতো হন্তেতি হন্তেরিতঃ
সন্ত্রাসাত্ স তু হন্তুমন্তিকগতাং তন্বীং কৃপাণীমধাত্॥ ৭ ॥

গৃহ্ণানশ্চিকুরেষু তাং খলমতিঃ শৌরেশ্চিরং সান্ত্বনৈঃ
নো মুঞ্চন্ পুনরাত্মজার্পণগিরা প্রীতোথ যাতো গৃহান্।
আদ্যং ত্বত্সহজং তথার্পিতমপি স্নেহেন নাহন্নসৌ
দুষ্টানামপি দেৱ পুষ্টকরুণা দৃষ্টা হি ধীরেকদা॥ ৮ ॥

তাৱত্ত্বন্মনসৈৱ নারদমুনিঃ প্রোচে স ভোজেশ্বরং
যূযং নন্বসুরাঃ সুরাশ্চ যদৱো জানাসি কিং ন প্রভো।
মাযাৱী স হরির্ভৱদ্বধকৃতে ভাৱী সুরপ্রার্থনা-
দিত্যাকর্ণ্য যদূনদূধুনদসৌ শৌরেশ্চ সূনূনহন্॥ ৯ ॥

প্রাপ্তে সপ্তমগর্ভতামহিপতৌ ত্বত্প্রেরণান্মাযযা
নীতে মাধৱ রোহিণীং ত্বমপি ভোসসচ্চিতসুখৈকাত্মকঃ।
দেৱক্যা জঠরং ৱিৱেশিথ ৱিভো সংস্তূযমানসসুরৈঃ
স ত্বং কৃষ্ণ ৱিধূয রোগপটলীং ভক্তিং পরাং দেহি মে॥ ১০ ॥

**********